Topic 59

# अजन्त नपुंसक लिंग अकारान्त शब्द

अतोऽम् ।

अतोऽङ्गात् क्लीबाद् स्वमोरम् । अमि पूर्वः - ज्ञानम् । एङ्ह्रस्वात् - ० इति हल्लोपः - हे ज्ञान ।

नपुंसकाच्च ।

क्लीबाद् औङः शी स्यात् । भसञ्ज्ञायाम् - यस्येति च ।

ईकारे तद्धिते च परे भस्य वर्णावर्णयोर्लोपः - इत्यलोपे प्राप्ते -

वा० औङः श्यां प्रतिषेधो वाच्यः । ज्ञाने ।

जश्शसोः शिः ।

क्लीबादनयोः शिः स्यात् ।

शि सर्वनामस्थानम् ।

शि इत्येतद् उक्तसञ्ज्ञं स्यात् ।

नपुंसकस्य झलचः ।

झलन्तस्याजन्तस्य च क्लीबस्य नुम् स्यात् - सर्वनामस्थाने ।

मिदचोऽन्त्यात् परः ।

अचां मध्ये योऽन्त्यः तस्मात् परस्तस्यैवान्तावयवो - मित् स्यात् । उपधा दीर्घः - ज्ञानानि पुनस्तद्वत् । शेषं पुंवत् । एवं धनवनफलादयः ।

'नुम्' का 'उम्' इत्संज्ञक है,

ज्ञानन् + ई । इस स्थिति में सर्वनामस्थाने चासम्बुद्धौ से नान्त अङ्ग 'ज्ञानन्' की उपधा को दीर्घ कर 'ज्ञानानि' रूप सिद्ध होता ।